**2015**

## M. A. Part–II Examination

## SANSKRIT

**PAPER—V**

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

## First Half

( Marks–60)

1. कस्यचिदेकस्य प्रश्नस्योत्तरं प्रदेयम् — 10

 a) मम्मटाभिमतं काव्यस्वरूपमुपवर्ण्यताम् ।

 b) काव्यकारणरूपेण यानि मम्मटसम्मतानि तानि व्याख्यायन्ताम् ।

(Turn Over)

c) सप्रसङ्गं व्याख्यायताम् —

i) वुधैर्वैयाकरणैः प्रधानभूतस्फोटरूपव्यङ्ग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृतः

ii) शब्दचित्रं वाच्यचित्रमव्यङ्ग्यं त्ववरं स्मृतम् ।

2. यथेच्छं प्रश्न एकः समाधेयः — 10

a) मम्मटमते शब्दः कतिविधः ? तेषु वाचकस्वरूपं वर्णयत ।

b) का नाम वृत्तिः ? मम्मटनये वृत्तयः? कति? तासु लक्षणायाः स्वरूपं सोदाहरणं यथाग्रन्थं प्रतिपादयत ।

c) सप्रसङ्गं व्याख्यायताम् —

i) तात्पर्यार्थोऽपि केषुचित्

ii) उभयरूपा चेयं शुद्धा उपचारेणामिश्रितत्वात्

3. यथाभिमतं प्रश्नद्वयस्योत्तरं प्रदेयम् — 10×2

a) सभेदं सोदाहरणमुपमालङ्कारस्वरूपं विशदयत ।

b) यथेच्छमलङ्कारद्वस्य स्वरूपं सोदाहरणं व्याख्यायताम् —

श्लेषः, अपह्नुतिः, समासोक्तिः, ससन्देहः ।

c) सयुक्तिकं यथेच्छं द्वयोः अलङ्कारनिर्णयः क्रियताम् —

i) वदनं वरवर्णिन्यास्तस्याः सत्यं सुधाकरः ।
सुधाकरः क्व नु पुनः कलङ्कविकलो भवेत् ॥

ii) राकायामकलङ्कं चेदमृतांशोर्भवेद्वपुः ।
तस्या मुखं तदा साम्यपराभवमवाप्नुयात् ॥





iii) देवी भावं गमिता परिवारपदं कथं भजत्वेषा ।
न खलु परिभोगयोग्यं दैवतरुपाङ्कितं रत्नम् ॥

iv) जितेन्द्रियतया सम्यग्विद्यावृद्ध निषेविणः ।
अतिगाढगुणस्यास्य नाब्जवद्भङ्गुरा गुणाः ॥

d) पार्थक्यं निरूपयत —

i) रुपकोत्प्रेक्षयोः

ii) दृष्टान्त-निदर्शनयोः

4. ध्वनिविरोधिमतवादेषु अभाववादिनां मतं सम्यगुपस्थाप्यताम् । 14

अथवा

आनन्दववर्धनकृतध्वनेः विभागद्वयस्य स्वरूपं व्याख्यायताम् ।

5. सप्रसङ्ग व्याख्यायतमङ्गं — 6

प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम् ।
यत्तत् प्रसिद्धवयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु ॥

अथवा

काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा ।
क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ॥

## Second Half

(Marks–40)

1. भरतमतानुसारेण कति वृत्तयः सन्ति? तेषां नामानि उल्लिख्य कैशिकीवृत्तेः स्वरूपं प्रस्तूयताम् । 14

अथवा

भट्टनायकस्य भुक्तिवादं निरूपयत ।

2. a) अधोलिखितेषु कस्यचिदेकस्य व्याख्या कार्या – 6

i) जग्राह पाठयमृग्वेदात्सामभ्यो गीतमेव च ।

यजुर्वेदादभिन्यान् रसानाथर्वणादपि ॥

ii) नैकान्ततोऽत्र भवतां देवानां चात्र भावनम् ।

त्रैलोक्यस्यास्य सर्वस्य नाट्यं भावानुकीर्तनम् ॥

iii) सर्वशास्त्राणि शिल्पानि कर्माणि विविधानि चा ।

अस्मिन्नाट्ये समेतानि तस्मादेतन्मया कृतम् ॥

अथवा

b) अधोलिखितेषु यथेच्छं <u>द्वितयस्य</u> टीका लेख्या – 3+3

जर्जरदण्डः, रङ्गपूजनस्य महत्त्वम्, अनुभावः, स्थायिभावः ।

3. कार्यस्य कति अवस्था सन्ति ? तासु अवस्थासु त्रयाणां स्वरूप सोदाहरणं प्रस्तूयताम् ।

अथवा

व्याख्यायताम् :—

रूपकं तत् समारोपात् ।

4. अधोलिखितेषु यथेच्छं <u>द्वितयस्य</u> टीका लेख्या – 3+3

प्रकरी, मुखसन्धिः वीथी, प्रवेशकः ।

—o—